# संस्कृताभिमानी स्वामिविवेकानन्दः

**जानकी शरणः**

स्वामीविवेकानन्दस्य अवतरणं भारतस्य सनातनधर्मस्य चेतिहासे सामान्यघटना नास्ति, अतस्तस्य परिचयकरणं नावष्यकम्। महापुरुषाणां वियति स्वामिविवेकानन्दः देदीप्यते इति निष्चप्रचम्। भारतस्य सीम्नः अतिक्रम्य समग्रस्य विष्वस्य कोणे कोणे वेदान्तस्य भारतीयसंस्कृतेष्व प्रचारम् अकार्षुः स्वामिपादाः। स्वामिपादानां चिन्तनं समयानुसारं, युगानुसारं चासीत्। तेषां चिन्तनं न केवलम् 'अद्य एतादृषी आवष्यकता संजाता अतः एवं व्याख्यानं क्रियते' इति दृष्ट्या आसीत्, अपि तु प्रामाणिकरीत्या, मूलभूतरीत्या तत्त्वतः एवमस्ति इति दृष्ट्या तेषां व्याख्यानानि अधुनापि विलसन्ति। स्वामिविवेकानन्दस्य जीवनं तथा सन्देषष्च अतिप्राचीनम् भारतराष्ट्रमिदं समसामयिकप्रपंचानुरूपं रूपान्तरयित्वा, स्वमूलेषु पुनः संस्थाप्य भारतराष्ट्रे तथाऽन्यत्र च कोटिषः जनानां भवितव्यानि रूपान्तरयितुं सन्मार्गे समन्वेतुं च प्रवर्तते। हिन्दुसमाजे विवेकानन्दस्य प्रसृतिः, वैष्विकस्तरे च तेषां प्रसिद्धिः, निरन्तरं तस्य नान्मा राष्ट्रस्य प्रत्येकं भागे, प्रत्येकं नगरे, प्रत्येकं महानगरे तथा असंख्याकेषु ग्रामेषु च लक्षषः सम्पद्यमानेषु कार्यक्रमेषु संस्थासु तथा सेवासु च व्यक्तीभवति।